National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(54): 214-218
© 2024 NJHSR
www.sanskritarticle.com

**मैत्रेयी आर्या**
शोधच्छात्रा,व्याकरणविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**मैत्रेयी आर्या**
शोधच्छात्रा,व्याकरणविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# गतिबुद्धि. इति सूत्रे पाणिनिवामनयोर्दिशा गत्यर्थोपपादनम्

**मैत्रेयी आर्या**

**व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति** व्याकरणमिति व्युत्पत्या व्याकरणशास्त्रस्य क्रियान्वयित्वं शब्दानां साधुत्वसम्पादने विद्यते इति सुस्पष्टं प्रतीयते। पुरा काले नवविधवैयाकरणाः बभूव ये व्याकरणशास्त्रस्य प्रणेतारोऽप्यासन्। तेषां व्याकरणानां सङ्ग्रहः एकस्मिन् श्लोके दृश्यते। तद्यथा-

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्॥**[1]

एतेषां सर्वेषामपि व्याकरणनानामाधिक्येन तत्तत्समकालिकशब्दानां साधुत्वसम्पादने एव सामर्थ्यं दृष्टम्। परं पाणिनिना यत्कृतं तेन व्याकरणेनैतावता प्रयुक्ताः शब्दास्सर्वेऽपि व्याकर्तुं शक्याः, अग्रेऽपि शक्ष्यन्त इति वचने नातिशयोक्तिः। अत एव वृत्तिकारेण **उपज्ञाते**[2] इति सूत्रस्योदाहरणसन्दर्भे **पाणिनिनोपज्ञातं पाणिनीयमकालकं व्याकरणमिति** स्पष्टमुक्तम्। तत्र शब्दाः द्विविधाः- लौकिकाः वैदिकाश्च। तयोर्द्वयोरपि साधुत्वमनेन शास्त्रेण प्रतिपाद्यते। शास्त्रेऽस्मिन् चतुस्सहस्रं(४०००) सूत्राणि विद्यन्ते। तत्र सूत्राणां षट्प्रकारकत्वं स्मृतम्। तच्च-

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते॥** इति।

सूत्रप्रकाराः- संज्ञा, परिभाषा, विधिः, नियमः, अतिदेशः, अधिकारश्चेति। तेष्वत्र व्याख्यायमानं सूत्रं वर्तते- **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ**[3] इति। पूर्वोक्तषड्विधसूत्रेष्वेतस्य सूत्रस्य नियमत्वमुक्तं सिद्धस्य कार्यस्य पुनर्विधानात्। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम्, अणिकर्ता, सः, णौ इति चतुष्पदि सूत्रमेतत्। गतिश्च बुद्धिश्च प्रत्यवसानञ्चेति गतिबुद्धिप्रत्यवसानानि तान्यर्थः येषामिति विग्रहः। शब्दः कर्म येषान्ते शब्दकर्मणः। न विद्यते कर्म येषां तेऽकर्मकाः। गतिबुद्धिप्रत्यवसानार्थश्च शब्दकर्मणश्चाकर्मकाश्च तेषामिति द्वन्द्वसमासः। अर्थशब्दः प्रत्येकमभिसम्बध्यते। तेन गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां शब्दकर्मणामकर्मकाणाञ्च धातूनामण्यन्तावस्थायां यः कर्ता सः ण्यन्तावस्थायां कर्मसंज्ञको भवतीति सूत्रार्थः सिद्ध्यति। प्रत्यवसानम्-खादनम्।

**गत्यर्थकोदाहरणम्-** रामः ग्रामं गच्छति, तं श्यामः प्रेरयतीति विवक्षायां प्रेरणार्थे विद्यमानत्वाद्धातोः णिच्प्रत्यये श्यामः रामं ग्रामं गमयतीति रूपं सिद्ध्यति। अत्राण्यन्तगमधातोः कर्ता यः गच्छति, सः रामः। ण्यन्तगमिधातोः कर्ता यः प्रेरयति सः श्यामः। एवं गमयतीति प्रयोगे ण्यन्तधातोः लादेशस्य कर्तरि कृतत्वात् कर्ताभिहित इत्यभिहिते कर्तरि प्रथमाविभक्तिः। ण्यन्तावस्थायामण्यन्तावस्थायाञ्च ग्रामस्य कर्तुरीप्सिततमत्वात् **कर्तुरीप्सिततमं कर्म**[4] इति सूत्रेण कर्मसंज्ञायां द्वितीयाविभक्तिः। तथा धातोः

गत्यर्थकत्वात् अण्यन्तावस्थायां यः कर्ता तस्य ण्यन्तावस्थायां गतिबुद्धीति सूत्रेण कर्मत्वसिद्धे रामशब्दादपि द्वितीया। एवं श्यामः रामं ग्रामं गमयतीति वाक्यस्य साधुत्वमङ्गीक्रियते।

**बुद्ध्यर्थकोदाहरणम्-** गुरुः शिष्यं शास्त्रमवगमयतीत्यत्र शिष्यः शास्त्रमवगच्छति, तं गुरुः प्रयुङ्क्ते इत्यर्थविवक्षायामण्यन्तावस्थायां यः कर्ता शिष्यः तस्य ण्यन्तावस्थायां कर्मसंज्ञा विधीयते। **कर्मणि द्वितीया**[5] इति द्वितीया विभक्तिश्च। ण्यन्तधातौ गुरोः कर्तृत्वात् प्रथमाविभक्तिः। ण्यन्ताण्यन्तावस्थायाञ्च शास्त्रस्येप्सिततमत्वात् कर्मसंज्ञा सिद्ध्यति। एवमेव माता पुत्रं मोदकं खादयति, अध्यापकः छात्राय पाठं पाठयति, माता पुत्रं स्वापयति इत्यदावपि ज्ञेयम्।

**ध्यातव्यः-** अकर्मकधातूनामण्यन्तावस्थायां कर्मणः असत्त्वात् ण्यन्तावस्थायामेकमेव कर्म दृश्यते। यथा- माता पुत्रं स्वापयतीत्यत्र पुत्रः एवैकं कर्म। अत्र पुत्रः स्वपिति, तं माता प्रेरयतीत्यर्थे अण्यन्तस्वपधातोः अकर्मकत्वं बोध्यम्। **अकर्मकत्वञ्च तत्समानाधिकरणफलवाचकत्वम्**[6]**।** तदित्यनेन व्यापारो ग्राह्यः। अर्थात् धात्वर्थयोः फलव्यापारयोरेकत्रैवावस्थानम्। यथा पुत्रः स्वपितीत्यत्र स्वपनानुकूलव्यापारः धात्वर्थः। तत्र स्वपनं फलम्। तत्र स्वपनानुकूलव्यापारः कटप्रसारणमक्षिपिधानमित्यादिक्रियाः। ते व्यापाराः पुत्रनिष्ठः। तथैव स्वपनं यत्फलं तदपि पुत्रनिष्ठमेवेति फलव्यापारयोः सामानाधिकरण्यात् स्वपधातोरकर्मकत्वं सिद्ध्यति। तेनाण्यन्तावस्थायामकर्मकधातोः कर्म न सम्पद्यते। अतः ण्यन्तावस्थायामेकमेव कर्म दृश्यते।

**सूत्रे कर्मशब्दार्थः**

**प्रश्नः-** गतिबुद्धीति सूत्रे शब्दकर्म, अकर्मक इति कर्मशब्दः द्विवारं पठितः। कर्मशब्दस्यार्थद्वयं वर्तते- क्रिया, कर्मकारकमिति। प्रकृतसूत्रे कर्मशब्दः क्रियापरो वा कर्मपरो वा?

**समाधानम्-** कर्मकारकपर एव। अत्र **कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः**[7] इति नियम एव मानम्। येषां शब्दानामथवा वर्णानां व्याकरणकार्याण्युद्दिश्य संज्ञाः क्रियन्ते तेषां कृत्रिमसंज्ञात्वं तथा शब्दस्य यः स्वगतार्थः तस्यार्थस्याकृत्रिमत्वं ज्ञेयम्। यथा व्याकरणशास्त्रे आ, ऐ, औ इत्येतेषां **वृद्धिरादैच्**[8] इति सूत्रेण वृद्धिरिति संज्ञा विधीयते। अस्याः वृद्धिसंज्ञायाः कृत्रिमत्वमुक्तम्। अकृत्रिमत्वं तु वृद्धिशब्दस्य स्वगतार्थः वर्धनम्। एवं व्याकरणशास्त्रे विहितानि कार्याणि कृत्रिमे एव कर्तव्यानीति परिभाषार्थः। तेन प्रकृतसूत्रे कर्मेति शब्दस्यापि **कर्तुरीप्सिततमं कर्म** इति सूत्रेण कृतस्याः कृत्रिमकर्मसंज्ञाया एव ग्रहणं कार्यम्। तेन शब्दः कर्मकारकं येषामित्यर्थः सिद्ध्यति। तस्मात् अध्यापकः छात्राय पाठं पाठयतीत्यत्र छात्रः पाठं पठति, तमध्यापकः प्रेरयतीत्यर्थे अण्यन्त-पठधातोः पाठः इति कर्म शब्दात्मकमेवेति तादृशशब्दकर्मकधातोः अण्यन्तावस्थायां यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा सिद्ध्यति।

**कर्मशब्दस्य क्रियापरकत्वे दोषः**

**प्रथमदोषः-** शब्दकर्म, अकर्मक इति द्वयोश्शब्दयोः कर्मेति प्रयुक्तस्य क्रियेत्यर्थपरकत्वं स्वीक्रियते चेत् शब्दः कर्म(क्रिया) येषामिति विग्रहः स्यात्। तेन शब्दक्रियकधातूनां ग्रहणं स्यात्। यथा क्रन्दति(क्रिदि आह्वाने रोदने च), ह्वयति(ह्वेञ् स्पर्धायां शब्दे च) इत्यादिधातूनामण्यन्तावस्थायां यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा स्यात्। तन्निवारणार्थं कर्मेति शब्दस्य कारकपरकत्वं स्वीकृतम्। तदुक्तं शेखरे- **तेन ह्वाययतिक्रन्दयत्योर्नेति**[9]। अर्थात् देवदत्तः यज्ञदत्तं ह्वयति, देवदत्तः यज्ञदत्तं क्रन्दति तमन्यः प्रेरयतीत्यर्थसापेक्षायामण्यन्तकर्तुः ण्यन्तावस्थायां कर्मसंज्ञा न । तेन अन्यः देवदत्तेन यज्ञदत्तं क्रन्दयति/ह्वाययतीति वाक्यं सिद्ध्यति।

**द्वितीयः दोषः-** शब्दकर्मेत्यत्र कर्मशब्दस्य क्रियापरकत्वे शब्दार्थकधातूनामेवान्वयसम्भवात् पार्थक्येन शब्दकर्मेत्यस्य ग्रहणं न क्रियेत साक्षात् गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामिति सूत्रं स्यात्। तेन गत्यर्थकानामित्यादीनामिव शब्दार्थकानामित्यर्थः लभ्येत, लाघवोऽपि स्यात्। एवं शब्दकर्मेति ग्रहणस्य वैयर्थ्यापत्तिः स्यात्। तन्निवारणार्थं शब्दकर्मेति पदेन शब्दः कर्मकारकं येषामित्यर्थः स्वीकर्तव्यः। तेन क्रन्दति, ह्वायति इत्यादीनां शब्दक्रियात्वेऽपि शब्दकर्मकारकत्वं नास्तीति गतिबुद्धीति सूत्रेण न तेषां कर्मसंज्ञा। तदुक्तं भैरवी व्याख्यायां- **गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामित्येव ब्रूयात्। तेन-तादृशव्याख्यानेन। ह्वाययतीति- अनयोः शब्दार्थकत्वेऽपि शब्दः कर्मकारकं येषान्तादृशार्थकत्वन्नास्तीत्यर्थः**[10]।

**भक्षेरहिंसार्थस्य नेति वार्तिकस्य वैयर्थ्यापत्तिः**

गतिबुद्धीति सूत्रे **भक्षेरहिंसार्थस्य न**[11] इति वार्तिकमेकं पठ्यते। भक्ष अदने इति प्रत्यवसानार्थकधातोरण्यन्तावस्थायां यः कर्ता तस्य ण्यन्तावस्थायां या कर्मसंज्ञा प्राप्नोति तस्य प्रकृतवार्तिकेन निषेध उच्यते। किन्तु गतिबुद्धीति सूत्रेऽण्यन्तावस्थायां यः कर्तेति स्पष्टमुक्तं परं भक्षधातोश्चौरादिकत्वात् भक्षयतीति स्वार्थे णिच्प्रत्ययस्य प्रयोगदर्शनेन अण्यन्तकर्तृत्वस्याभावः आपद्यते। यथा- बालकः ओदनं भक्षयति, तं माता प्रेरयतीत्यत्र भक्षधातोः णिच्प्रत्ययः स्वार्थे विहितः। तर्हि तस्याण्यन्तत्वमेव न सिद्ध्यति चौरादिकत्वात्। एवं कर्मत्वस्य प्राप्तेरभावात्तस्य निषेधस्य वैयर्थ्यं स्पष्टमेव।

**हेतुमण्णिचः स्वीकारे भक्षेति वार्तिकस्य सार्थक्यम्**

गतिबुद्धीति सूत्रे अणिकर्ता, णौ इति णिच्प्रत्ययः द्विवारं स्वीकृतः। तत्र **हेतुमति च** इति सूत्रेण विहितस्य णिचः एव ग्रहणम्। तेन **भक्षेरहिंसार्थस्य न** इति वार्तिकस्य चारितार्थ्यम्। सामान्यणिचः स्वीकारे तु नित्यण्यन्तधातूनां कर्मत्वं न सिद्ध्येत्। तदुक्तं शेखरे- **अत्र णिच् हेतुमण्णिजेव, स णावित्यत्रापि स एव व्याख्यानात्। अत एव भक्षेर्निषेधश्चरितार्थः। स हि नित्यण्यन्ताश्चुरादिरिति बोध्यम्**[12]।

**सूत्रस्य वैयर्थ्यापत्तिः**

रामः ग्रामं गच्छति, तं विष्णुः प्रेरयतीति विवक्षायां विष्णुः रामं ग्रामं गमयतीत्यत्र ण्यन्तगमिधातोः व्यापारद्वयार्थकत्वं भवति। तेन फलमपि द्वे भवतः। यथा- संयोगानुकूलव्यापारानुकूलव्यापार इति। अत्र संयोगरूपफलाश्रयत्वात् ग्रामस्य कर्मत्वं सिद्ध्यति। तथा यः संयोगानुकूलव्यापारः रामनिष्ठः तस्य रामस्य प्रेरकः विष्णुरिति ण्यन्तधातोः संयोगानुकूलव्यापाररूपफलाश्रयत्वाच्च विष्णोरपि कर्मत्वं **कर्तुरीप्सिततमं कर्म** इति सूत्रेणैव सिद्ध्यति। एवं सूत्रेणैव द्वयोः कर्मसंज्ञासिद्धे पुनः गतिबुद्धीति सूत्रेण कर्मसंज्ञाविधानस्य वैयर्थ्यापत्तौ सूत्रवैयर्थ्यं स्पष्टम्।

**सूत्रस्य नियमत्वम्**

**सिद्धे सत्यारभ्यमाणो विधिर्नियमाय कल्पते** इति वचनात् प्रयोज्यमुख्यकर्मणोः **कर्तुरीप्सिततमं कर्म** इति सूत्रेणैव कर्मत्वसिद्धे पुनः विधिरारभ्यते। तेन ज्ञायते- यदि प्रयोज्यस्य कर्मत्वं तर्हि सूत्रे प्रोक्तानामेव, न सर्वेषामिति। तेन सूत्रोक्तानां गत्यर्थकानां बुद्ध्यर्थकानां, प्रत्यवसानार्थकानां, शब्दकर्मणां, अकर्मकाणाञ्च धातूनामेवाण्यन्तावस्थायां यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा सिद्ध्यति, न सर्वत्रेति नियमेन सूत्रस्य चारितार्थ्यं स्पष्टम्।

**प्रश्नः-** महाभाष्ये **अदिखादिनीवहीनां प्रतिषेधः**[13] इति वार्तिकेन नीवह्योः प्रापणार्थकधात्वोः कर्मसंज्ञायाः प्रतिषेधः प्रोक्तः। तेन गतिबुद्धीति सूत्रे गत्यर्थधातुषु प्रापणार्थकधातवोऽपि गृह्यन्ते वेति प्रश्नः उदेति? यदि गृह्यन्ते, तर्हि हरिवह्योरिति वार्तिके वहग्रहणस्य प्रत्याख्यानपरभाष्यमसङ्गतं स्यात्?

**समाधानम्-** अदिखादीत्यादिवार्तिकेन अद भक्षणे खादृ भक्षणे इति प्रत्यवसानार्थकधात्वोः गतिबुद्धीति सूत्रेण प्राप्तकर्मत्वस्य निषेधः क्रियते। तथैव णीञ् प्रापणे वह प्रापणे इति प्रापणार्थकधात्वोरपि प्राप्तकर्मत्वस्य निषेधः क्रियत इति स्वीकारे तु **न गतिहिंसार्थेभ्यः**[14] इति भाष्यं न सङ्गच्छते। वस्तुतः गत्यर्थेषु प्राप्त्यर्थकधातूनामन्तर्भावः भाष्यकृता नाङ्गीक्रियते। तत्र **न गतिहिंसार्थेभ्यः** इति सूत्रभाष्यमेव मानम्। तत्र वार्तिककारेण **हरिवह्योरप्रतिषेधः**[15] इति वार्तिकमेकं पठितम्। तदुद्दिश्य भाष्यकारेण **न वहिर्गत्यर्थः। देशान्तरप्रापणक्रियोऽत्र वहिरि**[16]त्युक्तम्।

**वहेरगत्यर्थत्वनिरूपणम्**

सामान्येन **कर्तरि कर्मव्यतिहारे**[17] इति सूत्रेण क्रियायाः व्यतिहारे गम्यमाने धातोरात्मनेपदप्रत्ययाः भवन्ति कर्तृवाच्येऽपीति धातोरात्मनेपदं विधीयते। यथा व्यतिलुनते क्षेत्रम्। अस्योत्सर्गसूत्रस्यापवादत्वेन **न गतिहिंसार्थेभ्यः** इति सूत्रात् गत्यर्थकधातूनां हिंसार्थकधातूनां तु नात्मनेपदमिति निषेधः उच्यते। यथा व्यतिहिंसति, व्यतिगच्छतीत्यादि। एतस्यापि प्रतिप्रसवरूपेण(निषेधस्य निषेधः) **हरिवह्योरप्रतिषेधः** इति वार्तिकमेकं **न गतिहिंसार्थेभ्यः** इति सूत्रे भाष्ये पठितम्। एतेन हृ हरणे, वह प्रापणे इति धात्वोः प्राप्तात्मनेपदनिषेधस्य प्रतिषेध उच्यते। हृ हरणे इत्यस्य हिंसार्थकत्वात् प्राप्तिः, वहधातोस्तु गत्यर्थकत्वात् प्राप्तिरिति वार्तिककाराशयः। परं भाष्यकारेण वहधातोः गत्यर्थकत्वमेव नास्तीत्यात्मनेपदस्य निषेधाभावात्तन्निषेधस्य वैयर्थ्यं प्रतिपाद्य वार्तिके वहग्रहणं प्रत्याख्यातम्। तत्र प्रत्याख्यानं कथमिति उद्योते नागेशेन स्पष्ट्यते। सूत्रे पठितगतिशब्दस्य गमधातुत्वात् तस्य यद्धात्वर्थफलं गम्यते तत्फलकधातव एव गत्यर्थशब्देन गृह्यन्ते। यथा गत्यर्थकधातूनां संयोगः फलम्, तथैव ग्रामं प्राप्तः इत्यत्र प्रापधातोः कर्तृकर्मणोः देवदत्तग्रामयोः संयोगः फलम्। स च संयोगः गतिं विना नैव भवतीति प्रापधातोः गत्यर्थकत्वं सिद्ध्यति। तदुक्तमुद्योते- **संयोगमूलकाधाराधेयभावः प्राप्तिरि**ति। **क्वचित्तत्र स्थितिरेव प्राप्तिरि**[18]त्यप्युक्तम्। यथा भूरनेन प्राप्तः इत्यत्र न व्यक्तेः भुवा संयोगः गम्यते अपितु केवलं भूरनेन सम्बद्धः इति सम्बन्धमात्रं गम्यते। तथैव वहधातोरपि प्रापणमर्थः। तत्तु सम्बन्धमात्रम्। तदुक्तं भाष्ये- **देशान्तरप्रापणक्रियोऽत्र वहिरि**[19]ति। देशान्तरेण सम्बन्धद्योतक इत्यर्थः। यथा संविवहन्ते गर्गैः इत्यत्र वहधातोः सम्बन्धमात्रद्योतकत्वम्। अत्र कन्याप्राप्तिफलकपाणिग्रहणद्वारकसम्बन्धः वहधात्वर्थः। न तु संयोगः। अतः अत्र संविवहन्ते इत्यात्मनेपदं प्रयुक्तम्।

**न गतीतिसूत्रेऽर्थग्रहणस्यावश्यकता**

**न गतिहिंसार्थेभ्यः** इति सूत्रेऽर्थग्रहणस्यावश्यकत्वनिर्णयं क्रियते प्रदीपोद्योते। सूत्रेऽर्थग्रहणं नाकरिष्यत् तर्हि न गतिहिंसयोः इत्येव सूत्रमभविष्यत्। तेनापि गतिहिंसार्थकयोर्धात्वोः इत्यर्थप्रतीतिसम्भव एव। पुनरर्थग्रहणं किमर्थमित्याशङ्कां परिह्रियते नान्तरीयकत-

येत्यादिना। अर्थात् यत्र गतिपूर्वकः संयोगः गत्यर्थः, तस्य धातोः गत्यर्थकत्वादात्मनेपदनिषेधः सिद्ध्यत्येव। यत्र तु गतिं विना धात्वर्थफलं न प्राप्नोति तत्रापि गत्यर्थकत्वमिष्यत इति सूत्रेऽर्थग्रहणं कृतम्। अत एव **हरिवह्योरप्रतिषेधः** इति वार्तिके वहधातुना अन्तरीयकतया अप्रतीयमानस्यापि गतेः तदर्थकत्वमभिमत्य वार्तिकारम्भः कृतः। परं तत्र गतेः प्रतीत्यभावान्न निषेध आवश्यक इति भाष्यकारेणोक्तम्। यत्र तु गतेरुपसर्जनत्वेनापि प्रतीतिः तत्र तु भवत्येवात्मनेपदत्वम्।

**नीवह्योर्नेति वार्तिकस्य वैयर्थ्यापत्तिः**

पूर्वोक्तानुसारेण प्रापणार्थकधातुषु गत्यर्थकधातूनां कार्याणि न प्राप्नुवन्ति चेत् गतिबुद्धीति सूत्रे भाष्ये नीवह्योर्न इति वार्तिकस्य वैयर्थ्यापत्तिः । अर्थात् गतिबुद्धीति सूत्रेण गत्यर्थकानामण्यन्तावस्थायां यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा भवतीति प्रोक्तम्। तत्र **अदिखादिनीवहीनां प्रतिषेधः** इति वार्तिकेन प्रापणार्थकधात्वोः नीवह्योः प्रतिषेधः प्रोक्तः। यदि प्रापणार्थकधातुषु गत्यर्थस्याभावः स्वीक्रियते चेत् नीवह्योः गत्यर्थत्वाभावात् कर्मसंज्ञायाः प्राप्तिरेव नास्ति। तयोः पुनः वार्तिकेन निषेध अनावश्यक एवेति वार्तिकेपठितनीवह्योर्वैयर्थ्यापत्तिस्स्पष्टैव।

**भाष्यरीत्या नीवह्योर्नेति वार्तिकस्य सार्थक्यम्**

**अदिखादिनीवह्योः प्रतिषेधः** इति वार्तिके पठितप्रापणार्थकधात्वोः नीवह्योः नीधात्वर्थफलं गतिं विना न सिद्ध्यति। यथा ग्राममजां नयतीत्यत्र पूर्वदेशात् स्वीकृत्योत्तरदेशप्रापणं ग्रामस्य अजायाः संयोगश्च गतिं विना न सम्भूयेते। अतः उत्तरदेशसंयोगः यत्फलं तस्य गतिं विना न सम्भवः इति साक्षात् गतेः प्रतीत्यभावेऽपि उपसर्जनत्वेन गतिः प्रतीयते। अतः तस्य गत्यर्थकत्वं स्वीक्रियते। तदुक्तं गतिबुद्धीति सूत्रे नागेशेनोद्योते **नयतेस्तु गत्युपसर्जनं प्रापणमर्थ इति गत्यर्थकत्वमस्त्येवे**[20]ति।

वहधातुप्रसङ्गे तु आदिखादीति वार्तिके वहग्रहणमुत्तरार्थमित्युक्तम्। अर्थात् **वहेरनियन्त्रकर्तृकस्य**[21] इत्यत्र वहधातोर्ग्रहणमावश्यकं, तदर्थं पूर्ववार्तिके वहग्रहणं कृतमित्युक्तम्। तेन वाहयति भारं भृत्येन इत्यत्र गतिबुद्धीति सूत्रेण न कर्मत्वम्। यत्र नियन्त्रकर्तृकत्वं तत्र त्वण्यन्तावस्थायां यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा सिद्ध्यत्येव। यथा वाहयति बलीवर्दान् यवान् इति। बलीवर्दाः यवान् वहन्ति, तान् देवदत्तः प्रेरयतीत्याकारकज्ञानं बोध्यम्। तत्र अण्यन्तावस्थायां नियन्त्रकर्तृकत्वस्यासङ्गत्या ण्यन्तवाहिधातोरेव नियन्त्रकर्तृकत्वं स्वीकर्तव्यम्।

शेखरेऽपि **प्रापणार्थवहेः गत्यर्थत्वाभावेऽपि ग्रामं प्राप्तः इत्यादौ तत्प्राप्तेर्गतिं विनाऽसम्भवाक्षिप्तगत्यापि गत्यर्थत्वमित्यभिमानेन वार्तिकारम्भ**[22] इति। अर्थात् नीवह्योः गत्यर्थत्वाभावेऽपि प्रापणक्रिया गतिं विना न शक्यते इत्युपसर्जनीभूतस्याः गतेर्विद्यमानत्वमभमत्य वार्तिकारम्भः क्रियते इति। यत्र तु प्रापणक्रियायां गतेरभावः प्रतीयते तत्र न भवति। यथा सुखं प्राप्तः, पुस्तकं प्राप्तः इत्यादि। तेन ज्ञायते यत् प्रापणार्थकधातूनामपि गत्यर्थकत्वेन स्वीकारे गत्यर्थकधातूनां विहितानि कार्याणि तेष्वपि सिद्ध्यन्तीति।

**काव्यालङ्कारसूत्रस्योपपादनम्**

एतावता सूत्रोक्तानंशान् प्रतिपाद्याग्रेऽस्मिन् सूत्रसन्दर्भे वामनाचार्येण स्वकाव्यालङ्कारसूत्रनामकग्रन्थे पञ्चमाधिकरणे शब्दशुद्धिर्नामकद्वितीयाध्याये गतिबुद्धीति सूत्रे गत्यर्थकधातूनां विषये सूत्रमेकं प्रणीतम्। तच्च- **लभेर्गत्यर्थत्वाण्णिच्यणौ कर्तुः कर्मत्वाकर्मत्वे**[23] इति। लभधातोः गत्यर्थकत्वप्रतीताप्रतीतौ अण्यन्तावस्थायां यः कर्ता तस्य क्रमशः कर्मत्वाकर्मत्वं सिध्यतीति सूत्रार्थः। अर्थात् डुलभष् प्राप्तौ इति धातोः प्राप्यर्थकत्वात् गतेः क्वचित् प्रतीतिः क्वचिदप्रतीतिश्च। यत्र गतिः प्रतीयते तत्र लभधातोः प्राप्युपसर्जनगतिरर्थः स्वीक्रियते। यथा ग्रामं प्राप्तः इत्यत्र ग्रामं गच्छतीति गत्यर्थबोधेन प्राप्त्यर्थस्यापि प्रकृतोदाहरणे गत्यर्थकत्वं सिद्ध्यति। अत्र गतेः प्राधान्येन दर्शनात् धातोः प्राप्त्युपसर्जनगतित्वं सिद्ध्यति। यत्र प्राप्तेः प्राधान्येन प्रतीतिः तत्र लभधातोः गत्युपसर्जनप्राप्त्यर्थः स्वीक्रियते। यथा सुखं लभते इत्यत्र सुखं प्राप्नोतीत्यर्थप्रतीतिः। तत्र गतेरुपसर्जनत्वमङ्गीक्रियते प्राधान्यं तु प्राप्त्यर्थस्य। तदुक्तं कामधेनूव्याख्याकारेण- **अस्त्ययं लभिः, यः प्राप्त्युपसर्जनां गतिमाह; अस्ति च यो गत्युपसर्जनां प्राप्तिमाहेति।**

**प्राप्त्युपसर्जनगतेरुदाहरणम्**

प्राप्युपसर्जनगतिरिति यत्र स्वीक्रियते तत्र गतेः प्राधान्यात् गतिबुद्धीति सूत्रेण कर्मत्वं सिद्ध्यति। यथा- **दीर्घिकासु कुमुदानि विकासं लम्भयन्ति शिशिराः शशिभासाः** इति। अत्रोदाहरणे कुमुदानां विकासालम्भने यत्परिवर्तनमस्माभिर्दृश्यते तस्य गतिर्विनासम्भव इति प्राप्त्युपसर्जनगतित्वमत्र स्वीकृत्य कुमुदस्थां गतिमादाय कुमुदानि विकासं लभन्ते, तं शशिभासाः प्रेरयन्तीत्यस्यामर्थविवक्षायामण्यन्तावस्थायां यः कर्ता तस्य ण्यन्तावस्थायां गतिबुद्धीति सूत्रेण कर्मसंज्ञासिद्धे कुमुदानि विकासं लम्भयन्ति शशिभासाः इति वाक्यसिद्धिः।

**गत्युपसर्जनप्राप्तेरुदाहरणम्**

**सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिस्सौधमिवाथ लम्भयन्।**
**द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमिवाचदच्युतः॥**[24]

**भावार्थः-** श्रीकृष्णस्य दन्तैरुद्भूतप्रकाशेन पूर्वमेव धवलशरीरेण प्रकाशमानस्य नारदस्य वपुः ततोऽधिकं धवलतरं कुर्वन् श्रीकृष्णः अवोचदिति श्लोकार्थः। तत्र सितं वपुः सितिम्ना लम्भयन्निति लभधातुप्रयोगे प्रकाशेन वपुरधिकं धवलं करोतीत्यर्थप्रतीतौ कुत्रापि

गतिर्न भासते। अतः अस्य गत्युपसर्जनप्राप्त्यर्थत्वं स्वीकृत्य गतेरभावान्न गतिबुद्धीति सूत्रेण कर्मत्वप्रसक्तिरिति वामनाचार्यमतम्। अत एवोक्तं सूत्रेण यदा लभधातोर्गत्यर्थत्वं तदा कर्मत्वं यदा तु गत्युपसर्जनप्राप्तिरर्थः तत्र तु न कर्मत्वमिति।

**वामनवैयाकरणोभयमतपरिशीलनम्**

वैयाकरणैः प्रापणार्थकानां न गत्यर्थत्वमित्यङ्गीकृतम्। परं क्वचित्प्राप्तौ गतेः प्रतीतिर्वर्तते। तत्र प्राप्तिरप्युत्तरदेशसंयोगफलकः स्यात् । तदा तत्र गतिकार्याणि सिद्ध्यन्ति। यथा ग्रामं प्राप्तः इति। यत्र तु धातोः सम्बन्धमात्रमर्थः। तत्र गतित्वाभावात् न गत्यर्थकत्वम्। यथा सुखं प्राप्तः, भूरनेन प्राप्तः इति। अत्र सुखेन सम्बद्धः, भुवा सम्बद्धः इत्येवार्थप्रतीतिः। न तेषां गतिपूर्वकसंयोगः तत्र गम्यते। परं नीवह्योर्नेत्यादिवार्तिके वहग्रहणे मानन्तु गतेः प्रतीत्यभावेऽपि तत्र गतिरस्तीत्यभिमानमिति स्पष्टमुक्तं शेखरे। परं वामनाचार्येण तु लभधातोः गत्यर्थागत्यर्थकत्वमुभयथा सिद्ध्यति यथा प्रापधातोर्दर्शितम्। तेन लभधातोरण्यन्तावस्थायां यः कर्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञा भवतीत्युक्तम्। तत्रापि प्राप्तिगत्योर्मध्ये एकस्योपसर्जनत्वमन्यस्य प्राधान्यं स्वीक्रियते। यत्र तु गतेः प्राधन्यं तत्र भवत्येवाण्यन्तकर्तुः कर्मसंज्ञा इति मतद्वये भेदः न दृश्यते, परं प्रतिपादनशैल्यां भिन्नत्वमवगम्यते।

**सारांशः**

अस्मिन् संसारे सम्पूर्णज्ञानपरम्परायाः वेदाः एवैकमात्राः स्रोताः सन्ति। तेषां विज्ञानेन प्राणिनः शुद्धचैतन्यमनस्काः भवन्ति। तादृशज्ञानभण्डारस्य यथोचितार्थपरिज्ञानार्थं शब्दानां ज्ञानमत्यन्तमावश्यकम्। एतादृशशब्दज्ञानं व्याकरणशास्त्रेण लभ्यत इत्युक्ते नातिशयोक्तिः। अत एव व्याकरणशास्त्रस्य वेदाङ्गेषु मुखत्वं प्रतिपाद्यते। यथा मनुष्यः स्वगतविषयाभिव्यक्तये मुखमाश्रयति, तथैव वेदार्थाभिव्यक्तिः व्याकरणशास्त्रेण सिद्ध्यतीत्यतः शास्त्रस्यैतस्य मुखत्वम्। एतादृशशास्त्रेण लौकिकाः वैदिकाश्च प्रयोगाः साधिताः। तत्र लौकिकप्रयोगविषये यत्र प्रयोज्यप्रयोजकप्रयोगाः, तादृक्षु स्थलेषु गत्यर्थकधातूनां विषये लेखेऽस्मिन् प्रतिपाद्यते। गतिबुद्धीति सूत्रेण विधीयमान कर्मत्वस्य यथा गत्यर्थकधातुयोगे प्रवृत्तिः, तथैव प्राप्त्यर्थकधातुयोगेऽपि भविष्यति वा। तत्र किं मानम्। एतस्मिन् विषये वामनाचार्येण स्वकाव्यालङ्करासूत्राणीति ग्रन्थे किं प्रतिपादितम्। भाष्यकारशेखरकारयोर्मतं किमित्यादयः सर्वे अंशाः अत्र प्रस्तूयन्ते।

**उपयुक्तग्रन्थसूची**


- लघुशब्देन्दुशेखरः भैरवीमिश्रकृतया भैरवीव्याख्यया सहितः,सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम् 2002
- महाभाष्यम्, प्रदीपोद्योतसहितम् प्रतिभा प्रकाशन, दिल्ली, प्रथमसंस्करण 1938, पुनर्मुद्रण 1999
- काव्यालङ्कारसूत्राणि तदुपज्ञकवृत्तिककाव्यालङ्कारकामधेनूटीकया हिन्दीव्याख्यया चोपेतानि, चौखम्बा संस्कृत संस्थान, वाराणसी
- परमलघुमञ्जूषा, किरणावली संस्कृतव्याख्योपेतहिन्द्यनुवादसहिता, चौखम्बा सुरभारती प्रकाशन, वाराणसी प्रथमसंस्करण 1991
- वैयाकरणसिद्धान्तकौमुदी, प्रथमो भागः, बालमनोरमातत्त्वबोधिनीसहिता(कारकप्रकरणान्ता) मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रण 2004
- परिभाषेन्दुशेखरः विजयाख्यव्याख्ययासमलङ्कृतः, चौखम्बा विद्याभवन, वाराणसी प्रथमसंस्करण 2009


**संदर्भः**


1. संस्कृतव्याकरण शास्त्र का इतिहास,प्रथम भाग,पृ.सं.65
2. अष्टाध्यायी सूत्रपाठः 4.3.115
3. अष्टाध्यायी सूत्रपाठः 1.4.52
4. अष्टाध्यायी सूत्रपाठः 1.4.49
5. अष्टाध्यायी सूत्रपाठः 2.3.2
6. परमलघुमञ्जूषा,धात्वर्थनिरूपणम्,पृ.सं.
7. परिभाषेन्दुशेखरः,परि.9.पृ.सं.39
8. अष्टाध्यायी सूत्रपाठः 1.1.1
9. लघुशब्देन्दुशेखरः,कारकप्रकरणम्,पृ.सं.112
10. लघुशब्देन्दुशेखरः,कारकप्रकरणम्,भैरवीव्याख्या,पृ.सं.113
11. वैयाकरणसिद्धान्तकौमुदी,भाग-1,कारकप्रकरणम्,सूत्रसङ्ख्या-540,वार्तिकसङ्ख्या-1111,पृ.सं.615
12. लघुशब्देन्दुशेखरः,कारकप्रकरणम्,पृ.सं.113
13. महाभाष्यम्1.अ.4.पा.3.आ.52.सू,पृ.सं.399
14. अष्टाध्यायी सूत्रपाठः1.3.15
15. महाभाष्यम्1.अ.3.पा.1.आ.3.सू,पृ.सं.222
16. महाभाष्यम्1.अ.3.पा.1.आ.3.सू,पृ.सं.223
17. अष्टाध्यायी सूत्रपाठः1.3.14
18. महाभाष्यम्1.अ.3.पा.1.आ.3.सू,उद्योतव्याख्या,पृ.सं.223
19. महाभाष्यम्1.अ.3.पा.1.आ.3.सू,पृ.सं.223
20. महाभाष्यम्1.अ.4.पा.3.आ.52.सू,उद्योतव्याख्या,पृ.सं.399
21. महाभाष्यम्1.अ.4.पा.3.आ.52.सू,वार्तिकम्,पृ.सं.399
22. लघुशब्देन्दुशेखरः,कारकप्रकरणम्,पृ.सं.117
23. काव्यालङ्कारसूत्राणि,5.2.9,पृ.सं.204
24. संस्कृतवाग्विलासः,तृतीयमुद्रा,पद्यभागः,श्रीकृष्णनारदसंवादः,श्लो.2